Total Pages—4 **PG/IVS/SAN-402/13**

# M.A. 4th Semester Examination, 2013

## SANSKRIT

PAPER – SAN-402

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

### GROUP – A

( *Literature and Literary Criticism* )

[ *Marks* : 40 ]

1. 'उत्तररामचरितम्' इति नाटकस्य चित्रदर्शननामकस्य प्रथमाङ्कस्य विषयम् आलोच्य तत्रत्यं नाटकीयं महत्वं प्रतिपाद्यताम् । 12

( *Turn Over* )

*अथवा*

'उत्तरे रामचरिते भवभूतिर्विशिष्यते'। इति उक्ते : सार्थकता सोदाहरणं प्रदर्श्यताम् ।

2. संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्यायताम् — 8

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ।।

*अथवा*

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ।।

3. 'अमरमङ्गलम्' इति नाटकस्य रचयितृनाम किम् ? अत्र नाटके कीदृशी प्रस्तावना दृश्यते ? प्रस्तावनेयं यथार्था न वेति विचार्यताम् ? 12

*अथवा*

अमरमङ्गलमिति नाटकस्य प्रथमाङ्कद्वायानुसारतो 'वीरायाः' चरित्रमालोच्यताम् ।

4. संस्कृतभाषया देवनागरीलिपिमनुसृत्य च सप्रसङ्गं व्यख्यायताम् — 8

याते प्रताप-तपने सहसा महास्तं
मेवारभूमिरखिला तिमिरावृतेयम् ।
अत्र स्थिताः सुविमला मणिदर्पणाश्च
बिम्बत्विषा विरहिता न तथा विभान्ति ।।

*अथवा*

तापं कृशानौ सलिलं समुद्रे
शैत्यं तुषारे सुषमां शशाङ्के ।
वृक्षानरण्ये चलनञ्च वायौ
वदाम्यशेषं गणना-प्रभावत् ।।

## GROUP – B

[ *Marks* : 40 ]

1. निम्नलिखितेषु प्रश्नेषु कस्यचिदेकस्य उत्तरं दयम — 13

(*क*) को नाम समाधिः ? सम्प्रज्ञातसमाधिः वैशद्येन आलोच्यताम् ।

(*ख*) का नाम वृत्तिः ? सा च कतिविधा ? ताश्च काः ? वृत्तीनां किलष्टत्वाक्लिष्टत्वयोर्भेदः प्रतिपादनीयः ।

(*ग*) विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् – सूत्रमिदं भाष्यदिशा व्यारव्यायताम् ।

2. अधोलिखितेषु पदेषु कस्यचिदेकस्य सुरगिरा देवनागरीलिपिमनुसृत्य टीका लेख्या — 7

(*i*) निद्रा ।

(*ii*) वैराग्यम् ।

(*iii*) ईश्वरः ।

3. अधोलिखितेषु प्रश्नेषु कस्यचिदेकस्य उत्तरं देयम् — 13

(*i*) शब्दब्रह्मणः स्वरूपमुपस्थाप्य तत्प्राप्त्युपायो वाक्यपदीयानुसारं निर्दिश्यताम् ।

(*ii*) व्याकरणं कथमपवर्गस्य द्वारमुच्यते ? सर्वासां विद्यानामधि विद्यत्वेनास्य शास्त्रस्य प्रामाण्यं विचारणीयम् ।

(*iii*) शब्दार्थसम्बन्धो ग्रन्थदिशा आलोच्यताम् ।

4. अधोलिखितेषु पदेषु कस्यचिदेकस्य संस्कृतभाषया देवनागरी लिपिमनुसृत्य टीका कार्या — 7

(*i*) कालशक्तिः ।

(*ii*) वाक् ।

(*iii*) अपोद्धारः ।

---